दारदः, पुं, ( दरदे देशविशेषे भवः । दरद+अण् । ) दरददेशोद्भवविषभेदः । इत्यमरः । १ । ८ । ११ ॥ पारदः । हिङ्गुलम् । इति मेदिनी । दे, ३१ ॥ समुद्रः । इति हारावली । ५६ ॥

दारबलिभुक्, पुं, (दारेण चञ्चुाघातजन्यविदारणेन बलिं भुङ्क्ते इति । भुज+क्विप् । ) बकपक्षी । इति त्रिकाण्डशेषः ॥

दाराः, पुं, ( दारयन्ति भ्रातृबन्धूनिति । दॄ+"दारजारौ कर्त्तरि णिलुक् च ।" ३ । ३ । २० । इत्यस्य वार्त्तिकोक्त्या घञ् णिलुक् च । ) भार्य्या । बहुवचनान्तोऽयम् । इत्यमरः । २ । ६ । ६ ॥ ( यथा, महाभारते । १ । १५९ । २७ ।

"आपदर्थे धनं रक्षेत् दारान् रक्षेत् धनैरपि ।
आत्मानं सततं रक्षेत् दारैरपि धनैरपि ॥" )

दारा, स्त्री, ( दारयति भ्रातिबन्धूनिति । दॄ+णिच्+अच्+टाप् । ) दाराः । इत्यमरटीकायां भरतः ॥ (यथा, भागवते । ७ । १४ । ११ ।

"अप्येकामात्मनो दारां नृणां स्वत्वग्रहो यतः ॥")

दारिः, स्त्री, ( दारयतीति । दॄ+णिच्+इन् । ) विदारकः । इति शब्दार्थकल्पतरुः ॥

दारिका, स्त्री, ( दारक+टापि अत इत्वम् । ) कन्या । इति जटाधरः ॥ ( यथा, हरिवंशे । ४१ । १५९ ।

"अरिष्टं वृषभं केशिं पूतनां दैत्यदारिकाम् ॥")

दारितः, त्रि, ( दार्य्यते स्मेति । दॄ+णिच्+क्तः । ) कृतदारणः । तत्पर्य्यायः । भिन्नः २ भेदितः ३ । इत्यमरः । ३ । १ । १०० ॥ विदारितः ४ । इति शब्दरत्नावली ॥ ( यथा, महाभारते । ३ । १०७ । ४९ ।

"अंशुमानेवमुक्तस्तु सगरेण महात्मना ।
जगाम दुःखात् तं देशं यत्र वै दारिता मही ॥"

ताड़ितः । यथा, कालिकापुराणे ९० अध्याये ।

"ततः सुदर्शनो राजा गदया दारितोऽपतत् ॥")

दारिद्र्यं, क्ली, (दरिद्रस्य भावः । दरिद्र+ष्यञ् ।) दरिद्रता । यथा,—

"प्रणीय दारिद्र्यदरिद्रतां नृपः ।"
इति नैषधे । १ । १५ ॥

( यथा, मृच्छकटिके १ अङ्के ।

"दारिद्र्यान्मरणाद्वा मरणं मम रोचते न दारिद्र्यम् ।
अल्पक्लेशं मरणं दारिद्र्यमनन्तकं दुःखम् ॥" )

निर्य्यकारान्तोऽप्ययम् ॥

दारी, स्त्री, (दारयति पदतलमिति । दॄ+णिच्+"सर्व्वधातुभ्य इन् ।" उणां ४ । ११८ । इति इन् । कृदिकारादिति पक्षे ङीष् । ) क्षुद्ररोगविशेषः । बिवाई इति लोके । तल्लक्षणम् यथा,—

"परिक्रमणशीलस्य वायुरत्यर्थरूक्षयोः ।
पादयोः कुरुते दारीं सरुजां तलसंश्रिताम् ॥"

तच्चिकित्सा यथा,—

"पाददार्य्यां शिरां प्राज्ञो मोचयेत्तलशोधिनीम् ।
स्नेहस्वेदोपपन्नौ च पादौ वा लेपयेन्मुहुः ॥
मधूच्छिष्टवसामज्जाघृतैः क्षारविमिश्रितैः ॥
क्षारो यवक्षारः ।
सर्ज्जाङ्कसिन्धूद्भवयोश्चूर्णं मधुघृतप्लुतैः ।
निर्म्मथ्य कटुतैलाक्तं हितं पादप्रमार्ज्जने ॥
मधुसिक्थकगैरिकघृतगुड़महिषाक्ष-सालनिर्य्यासैः ।
गैरिकसहितैर्लेपः पादस्फुटनापहः सिद्धः ॥
मधुसिक्थक मोम । प्रथमं गैरिकं शिलाजतु । द्वितीयं गैरिकं गेरु इति लोके । सालनिर्य्यास राल ।
उन्मत्तकस्य वीजेन माणकक्षारवारिणा ।
विपक्वं कटुतैलन्तु हन्याद्दारीं न संशयः ॥
इति धत्तूरतैलम् ॥" इति भावप्रकाशः ॥

दारु, क्ली, पुं, (दीर्य्यते इति । दॄ+"दॄसनिजनीति ।" उणां । १ । ३ । इति ञुण् । ) काष्ठम् । इत्यमरभरतौ ॥ ( यथा, महाभारते । १ । १४५ । ११ ।

"शणं तैलं घृतञ्चैव जतु दारूणि चैव हि ।
तस्मिन् वेश्मनि सर्व्वाणि निक्षिपेथाः समन्ततः ॥")

दारु, क्ली, (दॄ+ञुण् ।) देवदारु । (यथा, सुश्रुते उत्तरतन्त्रे । १७ ।

"दारुपद्मकशुण्ठीभिरेवमेव कृतोऽपि वा ॥"

अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

"सुरदारु द्रुकिलिमं सुराङ्कं भद्रदारु च ।
देवकाष्ठं पीतदारु देवदारु च दारु च ॥")

पित्तलम् । इति मेदिनी । रे, ४७ ॥

दारु,, त्रि, ( दॄ+ञुण् । ) शिल्पी । दारकः । इति धरणी ॥ ( यथा, ऋग्वेदे । ७ । ६ । १ ।

"इन्द्रस्येव प्र तवसस्कृतानि वन्दे दारुं वन्दमानो विवक्मि ॥"

"दारुं पुरां भेत्तारं वन्दे ।" इति तत्र सायनः ॥ ) दाता । इति त्रिकाण्डशेषः ॥

दारुकं, क्ली, ( दारु+स्वार्थे कन् । ) देवदारु । इति राजनिर्घण्टः ॥

दारुकः, पुं, श्रीकृष्णसारथिः । इति त्रिकाण्डशेषः ॥ ( यथा, महाभारते । २ । २ । २८ ।

"दारुकेण च सूतेन सहितो देवकीसुतः ॥"

योगाचार्य्यविशेषः । स तु महादेवस्य अवतारविशेषः । यथा, शिवपुराणे वायुसंहितायाम् । २ । १० । ४ ।

"जटामाली चाट्टहासो दारुको लाङ्गली तथा ॥" )

दारुकदली, स्त्री, ( दारुवत् कठिना कदली । ) वनकदली । इति राजनिर्घण्टः ॥

दारुका, स्त्री, ( दारुणा काष्ठेन कायतीति । कै+कः । टाप् । ) काष्ठमयस्त्री । काठेर पुतुल इति भाषा । तत्पर्य्यायः । पुत्तिका २ दारुस्त्री ३ शालभञ्जिका ४ शालभञ्जी ५ शालाङ्की ६ । इति शब्दरत्नावली ॥ दारुपुत्तिका ७ कुरुटी ८ दारुगर्भा ९ । इति हारावली । ७१ ॥

दारुगन्धा, स्त्री, ( दारुणि गन्धो यस्याः । ) चीड़ानामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

दारुगर्भा, स्त्री, ( दारुमयो गर्भो यस्याः । ) दारुमयस्त्री । इति हारावली । ७१ ॥

दारुजः, पुं, ( दारुणो जायते इति । जन+डः । ) मर्द्दलः । इति शब्दरत्नावली ॥ काष्ठनिर्म्मिते, त्रि ॥ ( यथा, कालिकापुराणे । ६७ अध्याये ।

"आसनं प्रथमं दद्यात् पौष्पं दारुजमेव वा ॥")

दारुणः, पुं, ( दारयतीति । दॄ+णिच्+"कॄदृदारिभ्य उनन् ।" उणां ३ । ५३ । इति उनन् । ) चित्रकः । इति राजनिर्घण्टः ॥ भयानकरसः । ( विष्णुः । यथा, महाभारते । १३ । १४९ । ७४

"सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ॥"

"सन्मार्गविरोधिनां दारुणत्वात् ( खण्डकत्वात् ) दारुणः ।" इति तद्भाष्ये शङ्करः ॥ ) भयहेतौ, त्रि । इत्यमरः । १ । ७ । २० ॥ (यथा, देवीभागवते । ५ । ४ । २७ ।

"हाहाकारो महानासीत् सम्प्रहाराश्च दारुणः
उत्पपात ततः सिंहो नृपस्योपरि दारुणः ॥"

कठोरः । यथा, तत्रैव । १ । ४ । ५२ ।

"दारुणं देहदमनं सर्व्वलोकभयङ्करम् ॥")

दारुणकं, क्ली, ( दारुणवत् कायतीति । कै+कः । ) मस्तकजातक्षुद्ररोगविशेषः । लोके रूसी इति ख्यातः । तस्य लक्षणमाह ।

"दारुणा कण्डुरा रूक्षा केशभूमिः प्रजायते ।
मारुतश्लेष्मकोपेन विद्याद्दारुणकन्तु तत् ॥
दारुणा कर्कशा ॥"

तस्य चिकित्सा यथा,—

"कार्य्यो दारुणके मूर्द्ध्नि प्रलेपो मधुसंयुतः ।
प्रियालवीजमधुककुष्ठमाषैः ससैन्धवैः ॥
आम्रवीजं तथा पथ्या द्वयं स्यात् मात्रया समम् ।
दुग्धेन पिष्टं तल्लेपो दारुणं हन्ति दारुणम् ॥
दुग्धेन खाखसं वीजं प्रलेपाद्दारुणं हरेत् ।
गुञ्जाफलैः शृतं तैलं भृङ्गराजरसेन च ॥
कण्डुदारुणहृत् कुष्ठकपालव्याधिनाशनम् ॥"
इति गुञ्जातैलम् ।" इति भावप्रकाशः ॥

( अथ भृङ्गराजतैलम् ।

"भृङ्गराजत्रिफलोत्पलशारि
लौहपुरीषसमन्वितकारि ।
तैलमिदं पच दारुणहारि
कुञ्चितकेशघनस्थितकारि ॥"

इति वैद्यकचक्रपाणिसंग्रहे क्षुद्ररोगाधिकारे ॥ )

दारुनिशा, स्त्री, ( दारुबहुला निशा हरिद्रा । ) दारुहरिद्रा । इति रत्नमाला ॥ ( अस्या गुणा यथा,—

"दार्व्वीनिशागुणा किन्तु नेत्रकर्णास्यरोगनुत् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

दारुपत्री, स्त्री, ( दारुणः पत्रमिव पत्रमस्याः । ङीष् । ) हिङ्गुपत्री । इति राजनिर्घण्टः ॥

दारुपीता, स्त्री, (दारुणा पीतेव । काष्ठप्रधानत्वात् तथात्वम् । ) दारुहरिद्रा । इति राजनिर्घण्टः ॥

दारुपुत्रिका, स्त्री, (दारुमयी पुत्रिका ।) दारुका । इति हारावली । ७१ ॥

दारुमुख्याह्वया, स्त्री, ( दारुमुख्यमाह्वयते स्पर्द्धते इति । आ+ह्वे+अच् ।) गोधा । इति राजनिर्घण्टः ॥